International Journal of Applied Research 2020; 6(2): 367-371




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2020; 6(2): 367-371
www.allresearchjournal.com
Received: 19-12-2019
Accepted: 11-01-2020

**निरंजन कुमार झा**
ग्राम–बनसारा, पो0– पचाढ़ी,
जिला–दरभंगा, बिहार, भारत

**Corresponding Author:**
**निरंजन कुमार झा**
ग्राम–बनसारा, पो0– पचाढ़ी,
जिला–दरभंगा, बिहार, भारत

# रामायणे वर्णितविषयाः

**निरंजन कुमार झा**

**प्रस्तावनाः**

संस्कृतसाहित्ये महर्षिवाल्मीकिः आदिकवित्वेन प्रतिष्ठितस्तदीया च रम्या रामायणी रचना आदिकाव्यपदमलौरोतीति नात्र विसंवादः विद्वत्सुः आप्रारम्भादेव काव्यमिदं कवीनाम् उपजीव्यत्वेन प्रतिष्ठितम् । यथोक्तम् –

आश्चर्यमिदमाख्यानं मुनिना सम्प्रकीर्तितम् ।
परं कवीनामाधारं समाप्तं च यथाक्रमम् । [1]

कविकुलगुरूः कालिदासोऽपि रामायणं 'कविप्रथम–पद्धतिः' [2] इतिरूपेण तत्प्रणेतारं वाल्मीकिञ्च आद्यकवित्वेन [3] स्वीचकार। बृहद्धर्मपुराणं रामायणं 'सर्वेषां काव्यानां सनातनं बीजम्' इति सोद्घोषं घोषयाञ्चकार। [4] अन्यत्रापि महर्षिर्वाल्मीकिः 'मधुमयभणितीनां मार्गदर्शिकविरूपेण' [5] सादरं स्मृतः। वस्तुतः काव्यमिदं न केवलं भारतीयवाङ्मयस्यापितु विश्ववाङ्मयस्य मुकुटमणिभूतं विराजते। एतत्तुल्यं ललितपदमञ्जुलं रसनिर्झरं विविध भावसमन्वितं सीतमाधुरीसम्भृतम् उदारार्थसमन्वितं लोकोपदेशपरं वेदार्थोपकारकञ्च अपरं महाकाव्यं निखिलेऽपि विश्ववाङ्मये नोपलब्धम्भवति साम्प्रतमपि।
यद्यप्यस्ति रामायणं निर्विवादरूपेण काव्यम्। वाल्मीकिः तत् काव्यम् आदिकाव्यमिति [6] वा नाम्नैव प्रचारितम्। लेखकनाम्नाऽप्यस्य वाल्मीकिकाव्यम् [7] इति नाम समुपलभ्यते। तत्रैव संहिता, रामसंहिता [8] रामायणम् [9] रामचरितम् [10] सीताचरितम्, पौलस्त्यवधः [11], रघुवरचरितम्, दशशिरवधः [12], रामकथा [13], प्रभृतिनामान्तराव्यप्यस्य प्राप्यन्ते। एषु स्थलेषु रामायणस्य काव्यत्वविषये न कऽऽपि शौा जायते, परं समस्या तु तदा सञ्जायते यदा रामायण एव वयं तत्कृते संहिता [14], आख्यान [15], पुनवृत्ताख्या [16], नमितिहास [17], प्रभृतिविशेषणानि प्रयुक्तानि पश्यामः। संहिता पदन्तु ऋगादिवैदिकसंहितार्थेषु रूढ़ः। परं लौकिकसंस्कृत संहितात्रयी अपि–रामायणसंहिता, महाभारतसंहिता, श्रीमद्भागवतसंहिता च। आसां ति सृणामपि संहितानां वेद विद्योपकारकत्वादेव 'संहिता' इति संज्ञा इति सम्प्रदायविदां मतम्। ''चतुर्विंशत्यक्षरक्लृप्तस्य गायत्रीमहामन्त्रस्य एकैव बीजाक्षरमालम्ब्यैकैकं सहस्रं श्लोकाः प्रणीताः।
रामायणेऽप्युक्तम्–

''गायत्र्याश्च स्वरूपं तद्रामायणमनुत्तमम्।'' [18]

वेदोपवृंहणार्थायैव रामायणं भगवता वाल्मीकिना मुनिवेषधारिभ्यां कुशीलवाक्यां शिक्षितमिति रामायणमेवात्र प्रमाणम ''वेदोपृंहणार्थायतावग्रहयत प्रभुः'' [19] इति वेदानां रामानुगतत्वमथवा रामकथायाः वेदसम्मितत्त्वं रामायणमित्थं प्रतिपादयति–

वेदा ब्राह्मरूपेण गायत्री सर्वरक्षिणी।
ओंकारोऽथवषट्कारः सर्वे राममनुव्रताः।। [20]

''रामायणं काव्यं सर्ववेदेषु सम्मतम्'' इति स्कन्दपुराणे रामायणमाहात्म्येऽप्युक्तम्। भगवता वाल्मीकिना रामायणरूपेण वेदा एव लौकिकभाषायामवतारिताः सर्वलोककल्याणार्थमिति पौराणिकाः –

वेदवेद्ये परे पुंसि जाते दशरथात्मजे।
वेदः प्राचेतसादासीत्साक्षाद् रामायणात्मना।।

एवं रामायणस्य वेदानुगतत्वात् संहितेति संज्ञा सिद्धयति पुष्यति चान्तरिकैर्व्याह्यैश्चानेकैः प्रमाणैः।

आख्यानं तु पूर्ववृत्तोक्तिः। तत्र पूर्ववृत्तकथनमात्रमेव प्रधानम्। परं यदा आख्यानं धर्मार्थकाममोक्षोपदेशसमन्वितं भवति प्रदा तद् इतिहास इति कथ्यते–

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते।।

अतः रामायणं मूलरूपेण आख्यानम्, बृहदाकारक्त्वाद्, बृहदाख्यानम्, प्राचीनत्वात् पुराख्यानम्, धर्मार्थकाममोक्षोपदेशसमन्वितत्वाद् इतिहास इति नाम्ना विश्रुतम्।
आचार्यवर्य्येण राजशेखरेण इतिहासस्य गतिर्द्विधा प्रतिपादितापरिक्रियात्मिका पुराकल्पात्मिका च–

परिक्रिया पुराकल्प इतिहासगतिर्द्विधा।
स्यादेकनायका पूर्वा द्वितीया बहुनायका।।

अत्र रामायणं तु परिक्रियात्मक इतिहासः एकनायकत्वाद् इति राजशेखरमतम्। परमेतन्मतं न समीचीनं, परम्पराविरूद्धत्वात्। विचारणीयमत्रैतद् यद् रामायणं काव्यरूपेणादिकाव्यरूपेण वा स्मरन्ती या महती कविपरम्परा वर्तते तत्र किं कारणम् अस्ति। लक्षणग्रन्थास्तु नितरामर्वाचीनाः। अतो विचारणीयं वर्तते यद् वाल्मीकिसमक्षे काव्यस्य किं स्वरूपमासीत् कश्च तस्य आदर्शः? काव्यम्बन्धिनः कीदृशाश्च विचारास्तस्य महाकवेः आसन्?
लौकिक संस्कृतसाहित्यस्यादिकाव्यं रामायणमत्र न कोऽपि विसंवादः। रामायणात्पूर्वं वैदिकवाङ्मयस्य महती दीर्घपरम्पराऽऽसीत्। यस्याः विशालं साहित्यं तदोपलब्धमासीदिति न सन्देहलवः। वैदिकसंहितासु कविकाव्यसम्बन्धिनी अवधारणा सुत्तरां सुस्पष्टाऽस्ति वैदिकपरम्परावलोऽनेन ज्ञायते यद् वेद एव ऋषिः [21] ऋषिरेव कविः कविरेव काव्यम्। अतः ऋषिः कविरस्ति, वेदश्च काव्यमस्ति। शतपथे समुद्घोषितं –त्रयी वै विद्या काव्यं छन्दः [22] वेदेषु नैकधा वेदमन्त्रार्थेषु काव्यशब्दस्य व्यवहारो दृश्यते। [23] वेदकाव्यं तु नितान्तं प्राचीन काव्यमिति ऋक्–

आत्मा यज्ञस्य रेहा सुष्वाणः पवते सुतः।
प्रत्नं निपातिकाव्यम्। [24]
वस्तुतः वेदस्य कविस्तु कवीनां कविः परमेश्वरः। [25]

स एव ऋषिः मन्त्रकर्त्ता च। परमकारूणिकपरमेश्वर प्रणीतत्वाद् वेदोऽपि लौकिककाव्यवद् लोकोपकरी वर्तते। शिवेतरक्षतिः परनिवृत्तिः, नियतिकृतनियमरहिता, अनन्यपरतन्त्रता नवरसरूचिरता च वैदिकाकाव्यस्य प्रयोजनानि लक्षणानि च। यथा–

पश्चात्पुरस्तादघरादुदक्तात् कवि काव्येन परिणाहिराजन्।
सखे सखायमजरो जरिम्णोऽग्रेमर्तांग्ने अमर्त्यस्त्वनः।। [26]

अत्र कविः स्वकाव्येन रक्षितुं प्रार्थितः कीदृशः कविः? सखाभूतः अमर्त्यः जरारहितश्च काव्यमपि अमर्त्यम् जरारहित्तम् सखाभूतञ्च भवति। शिवेतरक्षतिः अमृतत्त्व प्राप्तिश्चात्र प्रयोजनम्। आनन्दभूतब्रह्मप्राप्तिस्तु वैदिककाव्यस्य परमं प्रयोजनम्। त्रयी ज्ञानमेव कवेर्लक्षणम्। [27] कविर्मुगनिर्माता भवति। [28] 'ये विद्वांसस्ते कवयः' इति शतपर्थब्राह्मणम्। [29] इत्थं सुस्पष्टं सञ्जायते रामायणात् प्राक्लोके या काव्यधारा प्रवहमानाऽऽसीत् सा तु आर्षी वैदिकी वेति नाम्ना प्रथिताऽऽसीत् तत्र ये उपरिनिर्दिष्टाः गुणाः सम्प्रोक्ताः यानि च तत्प्रयोजनानि कल्पितानि याश्च कवेरसामान्याः विशेषताः स्वीकृतास्तव एव काव्यगुणाः तान्येव काव्यप्रयोजनाति ता एव कवेर्विशेषताः वाल्मीकिनाऽपि स्वकाव्ये स्वीकृताः। रामायणस्य कविन्र कोऽपि साधारणपुरूषः। स तु तपः स्वाध्यायनिरतस्तपस्वी, वाग्बेत्ता ऋषिर्वर्तते। सोऽस्ति ब्रह्मवेत्ता मुनिपुंवश्च। तदीया काचिदपि वाग् अनृता भवितुं शक्नोति। तदीयं काव्यं न कृत्रिमम्। तत्तु करूणरसक्षालितसर्वकल्पमषतया नितान्तस्वच्छान्तः – करणात्समुल्लसितं ब्रह्मणा प्रचोदितञ्च काव्यं वर्तते। [30] वाल्मीकिना स्वयमेव रामायणकाव्यस्य गुणा इत्थं कीर्तिताः – उदारवृत्तार्थपदैर्मनोरमै–

स्तदास्य रामस्य चकार कीर्तिमान्।
समाक्षरैः श्लोकशतैर्यशस्विनो
यशस्करं काव्यमुदारदर्शनः।।
तदुपगतसमाससन्धियोगं,
सममधुरोनतार्थवाक्यबद्धम्।
रघुवरचरितं मुनिप्रणीतं
दशशिरसश्चवधं निशामयध्वम्।। [31]

अपि च–

पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरवितम्।

जातिभिः सप्तभिर्युक्तं तन्त्रीलयसमन्वितम् ।।
रसैः श्रृंरकरूणहास्यरौद्रभयानकैः ।
वीरादिभी रसैर्युक्तं काव्यमेतदगायताम् ।। [32]

अस्ति रामायणं महाकाव्यम्। स्कन्दपुराणञ्च तन्महिम्नि सोद्घोषं ब्रवीति—

रामायणं महाकाव्यं सर्ववेदेशु सम्मतम् ।
सर्वपापप्रशमनं दुष्टग्रहनिवारणम् ।।

तत्र किन्नाम महाकाव्यम्? विषयेऽस्मिन् रामायण एव सौतरूपेण महाकाव्यस्य लक्षणं निगदितं प्राप्यते। यथा—

किं प्रमाणमिदं काव्यं का प्रतिष्ठा महात्मनः ।
कर्त्ता काव्यस्य महतः क्व चासौ मुनिपुंनः ।।

अत्र काव्यस्य महतः इति पदाम्यां समासेन महाकाव्यमिति निर्दिष्टम् श्लोकेऽस्मिन् महाकाव्यविषये चत्वारो प्रश्नाः समुत्थापिताः —काव्यस्य किं प्रमाणम्, अत्र काव्ये कस्य प्रतिष्ठा, काव्यस्य कर्त्ता कः? कुत्र च निवसति? अत्र तु टीकाकाराणां मतानि द्रष्टव्यानि। रामायण तिलके तु ''महात्मनः कवेः का प्रतिष्ठा' को विषय इत्यर्थः। 'महात्मनो इति पाठे महात्मनोर्भवतोः प्रतिष्ठा। आश्रय इत्यर्थः कर्त्ताः काव्यस्येत्यत्र क इत्यनुकर्षः। क्व चासौ आस्त इति शेषः।''
परं रामायणशिरोमण्किारस्तु ''इदं काव्यं किम्प्रमाणं कियत्यरिमितिकम्। महात्मनः अतिप्रयत्नन्निष्पन्नस्य काव्यस्य का प्रतिष्ठा कियत्कालपर्यन्तं स्थितिरित्यर्थः। काव्यकर्त्ता मुनिपुंगवः क्व चास्ति। कर्तुः स्थितिमात्रप्रश्नेन कर्तृत्वस्य मुनौ निश्चयोऽस्तीति सूचितम्।
गोविन्दराजीये रामायणभूषणे तु ''का प्रतिष्ठा कियत्यर्यन्तमित्याशयः'' इत्येवं विशेषः।
उत्तरं तु कुशीलवौ इत्थम् ऊचतुः —

''वाल्कीमिर्भगवान्कर्ता सम्प्राप्तो यज्ञसंविधम् ।। [33]

अर्थात् काव्यप्रणेता भगवान् वाल्मीकिर्न तु कोऽपि प्राकृतजनः स तु यज्ञसदसि विराजते। अर्थात् तदीयोऽधिकसमयः यज्ञसम्पादनकर्मसु एव क्षीयते। सोऽस्ति प्राचेतसो भार्गवः।

''सन्निबद्वश्लोकानां चतुर्विशत्सहस्रकम् ।
उपाख्यानशतं चैव भार्गवेन तपस्विना ।। [34]

काव्यमिदं चतुर्विशत्सहस्रश्लोकात्मकं वर्तते। तत्र उपाख्यानानां संख्या शतम्। अस्ति। उपाख्यानशतम्। श्लोपाख्यानान्तम्— इति गोविन्दराजः। वेदप्रमाणसमन्वितम् इति शिरोमणिकारः।

''प्रतिष्ठा जीवितं यावत् तावत्सर्वस्व वर्तते'' [35]

काव्यनायकस्य जीवितं यावद् यच्छुभाशुभं कर्म तस्य सर्वस्यात्र प्रतिष्ठा निबन्धनं वर्तत—इति तिलककारः।
रामायणशिरोमणिकारस्तु ''तव चरितं कृतं तस्य प्रतिष्ठा यावत्सर्व लोकस्य जीवितं वर्तते तावदस्तीति।''
वाल्मीकिरामायणे अनेकानि विषयानि वर्णितानि सन्ति। तत्र विश्वबन्धुत्वस्य वर्णनं यथा वेदे उपनिषदि पुराणादि ग्रन्थे विद्यते तथैव रामायणेऽपि। अथर्ववेदे विश्वबन्धुत्वस्य वर्णनमेवं विद्यते—

शं नो वातः पवतां शं नः तपतु सूर्यः ।
शं नः कनिक्रदद्देवः पर्जन्योऽभि वर्षतु ।। [36]

एवं—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखमाग् भवेत ।। [37]

अर्थात् इह लोके सर्वे सुखिनः भवन्तु सर्वे स्वस्थाः भवन्तु सर्वे कल्याणेनयुक्ताः भवन्तु कोऽपि कापि च कष्टेन युक्ताः न भवन्तु।
अपि च गीतायां भगवता श्रीकृष्णेन—

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्विषैः ।
भुङते ते त्वद्यं पापा ये पचन्त्यात्मकारणात् ।। [38]

विष्णुधर्मोत्तरपुराणेऽपि विश्वबन्धुत्वस्य चर्चा एवमस्ति—

श्रृणुते सर्वधर्माश्च सर्वान् देवान् नमस्यति ।
अनसूयुर्जितक्रोधस्तस्य तुष्यति केशवः ।। [39]

पुनश्च ऋग्वेद—

संच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूवं संजनाना उपासते ।। [40]

वाल्मीकिरामायणस्य बालकाण्डे—

सत्यसन्धस्यवीरस्य सर्वेषां नो हितैषिणः ।
विष्णोः सहायान् बलिनः सृजध्वं कामरूपिणः ।। [41]

वाल्मीकिरामायणस्य युद्धकाण्डे—

मरणान्तानि वैराणि निवृत्तं नः प्रयोजनम् ।
क्रियातामस्य संस्कारो ममाप्येष यथा तव ।। [42]

वाल्मीकिरामायणस्य अयोध्याकाण्डे–

धर्मबन्धेन बद्धोऽस्मि तेनेमां नेह मातरम्।
हन्मि तीव्रेण दण्डेन दण्डाहां पापकारिणीम्।।[43]

एवं सप्तासुकाण्डेषु बहुत्र विश्वबन्धुत्व भावनायाः वर्णनं वाल्मीकिरामायणे दरिदृश्यन्ते। तेषु मानवानां सर्वविधनिकासः सम्भवति। अपि च सामाजिक कुरीतीनामयसारणं तेन भवितुमर्हति। विश्वबन्धुत्वभावनाद्वारा आदिकविना वाल्मीकिना इयं परम्परा प्रवर्तिता यत् सात्त्विकपात्राणि स्वशक्तिभिः सिसाधयिषितं साधयन्ति। ''रामो विग्रहवान् धर्मः'' स स स्वयं मुध्यति, पराजयते च विरूद्धान् किन्तु न त्यजत्यौ दार्यम्।यदा रामस्य वाणाः दशमुखं प्रथमं संस्पृशन्ति तदा रावणः किमप्यननुभूत–पूर्वमनु भवति। त्रुट्यति तदीयं दयम्। ध्वंसो भवति धैर्यस्यं। पराहविर्दशति तदीयां निखिलामंयष्टिम्। अवस्थायामस्यां भगवान् रामो वदति दशानन्। परिश्रान्त इव प्रतीयसे, याहि गृहम्। विश्रम्यता मा गम्यतां, यदि रोचते युद्धम्। रावणः परावर्तते अथ च रामाभिमुखं तावन्नायाति यावत् तस्य सर्वोऽपि परिवारो निधनं न याति। इदमासीदौदार्य भगवतो रामस्य।
धैर्योदार्यसम्प्लुतपराक्रमप्रदर्शनस्य वाल्मीकिस्थापिता परम्परा परवर्तिकविभिः भृशमनु ता। शिशुपालवधे श्रीकृष्णः प्रतीपानां विनाशने कौतुकं करोति। विनोदेन औदार्येण पराक्रमं दर्शयन् विसूदयति वैरिवृन्दम्। रघुवंशे पन्दिनीमाक्रम्य रोषरूषिताम् सिंहाय दिलीपः आत्मानपर्ययति सिद्धश्च भवति स्वोद्देश्ये।

सेयं स्वदेहार्पणनिष्क्रमेण न्याय्या मया मोचयितुं भवतः।
न पारणा स्याद् विदृता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः।।[44]
स्वविर्यगुप्ताहि मनोः प्रसूतिः।[45]

एवमेव सर्वहुदयज्ञे मृमंयपात्रशेषो रघुः वरतन्तुशिष्याय कौर्टसाय गुरुदक्षिणामर्पयितुं कुबेरमाक्रामति स्वर्णवृष्टिं कारयति प्रयच्छतिं च यथेष्टं स्वर्णराशिम्।
मानवतायाः संरक्षणम्–आदिकविना दयादाक्षिण्यादिसंरक्षणार्थ स्वकाव्ये केचन घटनाविशेषः निर्मिताः। रामेण राज्यं प्राप्यमासीत्, किन्तु कैकेय्या सदृसा तस्य चतुर्दशवार्षिको वनवासो भवति। परन्तु रामे तत्र राज्यप्राप्तेर्न प्रसादः। नापि च वनवासमूलो विषादः माता कौशल्या वनगमनाद् विरमयति। रामो न जिहीर्षति प्रस्थानम्। पिपालयिषति पितुराज्ञाम्। न कामयते राज्यं न चापि बिभेति वनक्लेशनिवहात्। वने अटाट्यमानो भगवान् दुष्टान् हिनस्ति, समुद्धारति साधून् प्रसादयति, सात्त्विकान् निषूदयति नृशंसान् राक्षसान्।

## संदर्भ सूची


1. वाल्मीकिरामायणम् बालकाण्डस्य, चतुर्थसर्गे–26–27।
2. रघुवंशे–15/33।
3. तत्रैव–41।
4. वाल्मीकिरामायणम् बालकाण्डस्य, चतुर्थसगे–26–27।
5. रघुवंशे–15/33।
6. तत्रैव–41।
7. पठ रामायणं व्यास काव्यबीजं सनातनम्। यत्र रामचरितं स्यात् तादहं तत्र शक्तिमान्।
8. रामायणचम्पूः–1/8।
9. आदिकाव्यमिदं चार्ष पुरा वाल्मीकिना कृतम्। युद्ध. 128/107/02 न ते वागनृतः काव्ये कापिदत्र भविष्यति। बाल. 2रु35/3 आदिकाव्यमिदं राम त्वयि सर्वं प्रतिष्ठितम्। उत्तर. 98/18।
10. युद्ध.–128/112,114।
11. भक्त्या रामस्य चेमां संहितामृषिणा कृताम्। युद्ध.–28/123।
12. बालकाण्ड–2/41,4/7,युद्ध. 128/111, 119, उत्तर.98/20 आदि।
13. रामस्य चरितं कृत्सनं कुरू त्वमृषिसत्तम्। बाल.2/32।
14. काव्य रामायणं कृत्सनं सीतायाश्चरितं महत्। पौलस्त्यबधमित्वयेवं चकार चरितव्रतः। बाल–4/7।
15. रघुवरचरितं मुनिप्रणीतं, दशशिरसश्च बधं निभामयध्वम्। बाल. 2/43।
16. रघुवरचरितं मुनिप्रणीतं, दशशिरसश्च बधं निभामयध्वम्। बाल. 2/43।
17. कुरू रामकथां पुण्यां श्लोकबद्धां मनोरमाम्। बाल. 2/36।
18. उत्तरकाण्डे–11/118।
19. बालकाण्डे–4/6।
20. उत्तरकाण्डे–108/8।
21. बालकाण्डे–128/123।
22. बालकाण्डे–4/26,32, उत्तर. 111/1,4 आदि।
23. बालकाण्डे–5/3।
24. ऋग्वेद–9/6/8।
25. युद्ध–128/121।
26. ऋग्वेद–10/87/21।
27. युद्ध–128/117।
28. ऋषिर्वेदे वसिष्ठादौ–मेदिनी। ऋषिस्तु वेदे ऋग्वादौ ज्ञानवृद्धे दिगम्बरे वैजयन्ती। ऋषिर्वेदः–तदुक्तं ऋषिणा इत्यादौ तथा दर्शनात्–1/1/16 पर तत्त्वबोधिनी (सम्बुद्धौ शाक्य स्येतावनार्षे) ऋषिर्वेदयत्रः तदुक्तं ऋषिणेति दर्शनात्। कर्त्तारिचार्षेदेवतयोः; 3/2186 पर सिद्धान्त कौमुदी 12. ऋषिस्तुता, ऋ. 7/75/5 ऋषिवोदनः ऋ.8/51/3 इत्यादीति वैदिकपदानि अत्र प्रमाणम्।
29. एते वै कवयः यदृशयः –शत–1/4/2/8।
30. अस्मा इत काव्यं वच इक्थमिन्द्राय शंस्यम्। ऋ. 5/39/5/2 अयं कृत्नुरमृभीतो विश्वविणदुद्मिदित्सोमः। ऋषिर्विप्तः काव्येन। तत्रैव–8/79/1।

31. बालकाण्डे–2/42–43।
32. बालकाण्डे–4/8–9।
33. ऋ. 2/23/1।
34. तत्रैव– 94/28।
35. ऋग्भिरेतं यजुर्किरन्तरिक्षं सामभिर्यन्तत्तकवयो वेदयन्ते। प्रसोप. 5/7 282, सीरा युञ्जन्ति कवयः युगा वितम्वते पृथक्। धीरा देवेषु सुक्नपया। ऋ. 10/101/4।
36. अथर्ववेद–7,69–1।
37. अज्ञात्।
38. श्रीमद्भागवतगीता–3–13।
39. विष्णुधर्मोत्तरपुराण–1,58।
40. ऋग्वेदन–10,191,2।
41. बाल्मीकिरामायणम् (बालकाण्ड)–1.3।
42. बाल्मीकिरामायणम् (युद्धकाण्ड)–109–25।
43. बाल्मीकिरामाणम् (अयोध्याकाण्ड)–106,9।
44. रघुवंश–2/55।
45. रघुवंश–2।